No. १०६८-घ

Title ब्रह्मचिन्तनिका

Author श्रीशंकराचार्य

Extent ६ Age

Subject वेदान्तशास्त्रम् सम्पूर्णम्

नं० १०७८-घ

ब्रह्मचिन्तनिका (वेदान्तशास्त्रम्)

पत्राणि ७ (सम्पूर्णम्)

नं० १०७८-घ

कर्ता श्रीशंकराचार्यः

श्रीगणेशायनमः श्रीगुरुभ्यो
नमः॥ ब्रह्मचिंतनिका॥ अह
मेवपरंब्रह्मवासुदेवाख्यम
व्ययं॥ यितिस्यांनिश्चितामुक्तो
बद्ध एवान्यथाभवेत्॥१॥ अ
हमेवपरंब्रह्मनचाहंब्रह्म

पृथक्॥ यित्यवसमुपासी

ब्राह्मणो ब्रह्मणि स्थितः॥२॥
अहमेव परं ब्रह्म निश्चितं चि
त्तचिंतितं॥ चिद्रूपत्वादसंग
त्वादबाध्यत्वात्प्रयत्नतः॥३॥
सर्वोपाधिविनिर्मुक्तं चैतन्यं
च निरंतरं॥ तद्ब्रह्माहमिति ज्ञा
त्वा कथं वर्णाश्रमी भवेत्॥४॥

अहं ब्रह्मास्मियो वेद स सर्व
भवत्तितीदं ॥ नाभूत्या नेषते
देवास्तस्यात्मेषां भवतिसा
॥५॥ अन्योसावहमन्योस्मि
स्यूपास्ते योन्यदेवतां ॥ न सं वे
द नरो ब्रह्म स देवानां यथा पशुः
॥६॥ अहमात्मान चान्योस्मि

ब्रह्मैवाहं न शोकभाक् ॥ सच्चि
दानंदरूपोहं नित्यमुक्तः स्व
भाववान् ॥ ७ ॥ आत्मानं सत
तं ब्रह्मसंभाव्य विहरंति ये ॥
न तेषां दुष्कृतं किंचिद्दुष्कृतो
या न चापदा ॥ ८ ॥ क्षणं ब्रह्मा
हमस्मीति यः कुर्यादात्मचिंत

नं॥ तन्महापातकं हंति तमः
सूर्योदियं यथा॥ ९॥ अज्ञाना
ब्रह्मणो जातमाकाशं बुद्बुदो
पमं आकाशाद्वायुरुत्पन्नो
वायोस्तेजस्ततः पयः॥ १० ॥
अद्भ्यश्च पृथिवि जातः ततो व्रि
हियवादिकं॥ पृथिव्यप्सु पयो

वन्हो वन्हिर्वायुर्नभस्यसो ॥१०॥
नभोप्यव्याकृतेतच्चव्युदोमुद्दो
स्म्यहंहरिः ॥ अहंविष्णुरहंवि
ष्णुरहंविष्णुरहंहरिः ॥११॥ के
तृभोक्तादिकसर्वंतदृवियोथ
मेवच ॥ अच्युतोहमनंतोहमा
नंदोहमहंहरिः ॥ गोविंदोहमत्रो

पोहमजोहममृतोस्म्यहं ॥१२॥
नित्योहं निर्विकल्पोहं निर्विका
रोहमव्ययः ॥ सच्चिदानंदरूपो
हं पंचकोशातिगोस्म्यहं ॥१३॥
अकर्त्ताहमभोक्ताहमसंगः प
रमेश्वरः सदा मत्संनिधानेन चे ४
ष्टते सर्वमींद्रियं ॥१४॥ आदिम

ध्यांतमुक्तोहंनबद्धोहंकदाच
न॥स्वभावनिर्मलश्शुद्धःस एवा
हंनसंशयः॥१६॥ब्रह्मैवाहंन
संसारिमुक्तोहमितिभावयेत्॥
अशक्नुवन्भावयितुंवाक्यमे
तत्सदाभ्यसेत्॥१७॥यदभ्या
सेनतद्भावोभवेद्भ्रमरकीटवत्॥

अत्रापहायसंदेहमभ्यसेत्तु
तन्निश्चयः॥१८॥ ध्यानयोगे
नमासैकात् ब्रह्महत्यामपोह
ती॥संवत्सरसदाभ्यासात्सि
द्ध्यष्टकमवाप्नुयात्॥१९॥याव
ज्जीवंसदाभ्यासात्जीवन्मुक्तो
भवेद्यतिः॥२०॥नाहंदेहानमे

प्राणानेंद्रियाणितथैवच॥न
मनोहंनबुद्धिश्चनाहंचित्तम
हंकृति॥२१॥नाहंपृथिवीन
सलिलंनचवन्हिस्तथानिल
॥नचाकाशोनचशब्दश्चनच
स्पर्शस्तथारसः॥२२॥नाहं
गंधोनरूपंचनमायाहंनसंस

तिः॥सदासाक्षीस्वरूपत्वाच्छि
वएवास्मिकेवलः॥२३॥मय्ये
वसकलंजातंमयिसर्वंप्रतिष्ठि
तं॥मयिसर्वंलयंयातितद्ब्रह्मा
द्वयमस्म्यहं॥२४॥सर्वज्ञोहमनंतोहंसर्वेशः सर्वशक्तिमान्
॥अनंदसत्यबोधोहंयितिब्र

स्मानुचिंतनं॥२५॥अयं प्रप
चो मिथ्यैव सत्यं ब्रह्माहमव्य
यं॥अत्र प्रमाणवेदांतो गुरु
वोनुभवस्तथा॥२६॥ब्रह्मै
वाहं न संसारी न चाहं ब्रह्मणः
पृथक्॥नाहं देहो न मे देहः के
वलोहं सनातनः॥२७॥ए

कमेवाद्वितियं ब्रह्मनेहनाना
स्तिकिंचनेतिश्रुतेः॥ इतिश्री
मत्परमहंसपरिव्राजकाचा
र्यश्रीमच्छंकराचार्यविरचिते
ब्रह्मचिंतनिकासमाप्तः॥ ५
श्रीगुरुअर्पणः॥ ॥श्रीमहा ७
कालेश्वरार्पणमस्तु॥ ॥